" अर्थशास्त्रसंकलकः कौटिल्यः "– प्रा. विल्हेल्म

मुम्बापुरी २७ फेब्रुवारी ६८ (शारदा-प्रतिनिधितः)

" कौटिलीयस्य अर्थशास्त्रस्य कानिचन मूलतत्त्वानि सर्वकालोपयुक्तानि विद्यन्ते । परम् इदम् अर्थशास्त्रं विविध-विषय-विवेचन-परम् एकाकिना केनचन विरचितम् इति न मे मतम् । चिरं यावत् तस्य रचनाकार्यं प्रचलितम् । कौटिल्यः केवलं तस्य संपादकः स्यात् न तु मूललेखकः" इति स्वाभिप्रायः कौटिलीयस्य अर्थशास्त्रस्य विषये प्रकटीकृतः म्यूनिक (जर्मनी) विद्यापीठस्य जर्मन प्राध्यापकेन प्रा. फ्रेडरिक विल्हेल्म-महोदयेन पत्रकार परिषदि । लॅटिन-ग्रीक-भाषातः संस्कृतभाषा श्रेष्ठा इति निवेद्य तैः प्रोक्तम्-" भारतस्य राष्ट्रभाषापदे संस्कृतम् आगच्छति चेत् तत् महते प्रमोदाय स्यात् ।

"पाश्चात्यराष्ट्रेषु भारतीयधर्मतत्त्वज्ञानविषये प्रेमभावना संप्रति वर्धिष्णुतां गच्छन्ती दृश्यते" इति निवेद्य तैः कथितम् " पाश्चिमात्ये जगति कामसूत्रग्रन्थः सर्वाधिकः लोकप्रियः विद्यते । कौटलीयार्थशास्त्रगतः कश्चन भागः कामसूत्रेषु याथातथ्येन समुद्धृतः विद्यते । "

तृतीयवारं भारतं प्राप्तैः ३६ वर्षवयस्कैः प्रा- विल्हेल्म महोदयैः प्राचीनभारतेतिहासविषये लिखितः ग्रन्थः इटालियन, फरेञ्च, आङ्ग्ली इति भाषासु नचिरमेव प्रकाशितः भवेत् ।

शारदा

सौर १ चैत्र १८९०

२१ मार्च १९६८

सोलापूर-संस्कृत-संमेलनम्

सोलापुर-नगरे पं. धुण्डिराजशास्त्री दाते, डॉ. राजाभाऊ जोशी, पं. बाळकृष्ण व्यास प्रभृतीनां परिश्रम-सातत्येन, श्रीमान् रामचन्द्र मर्दा-नेतृत्वेन, ' शारदा 'काराणां मार्गदर्शनेन च सुसंपन्नं संस्कृतसंमेलनं १२।२।६८ दिने । डॉ. मॅथ्यू राइनर लेदर्ले महोदयेन जर्मन-प्राध्यापकेन उद्घाटितस्य संमेलनस्य अस्य साभापत्यं मण्डितं डॉ. हरिरामचन्द्र दिवेकरैः । पं. शेण्डये गणेशशास्त्री, पं. मोहोळकरशास्त्री, पं. श्रीपाद कवीश्वर, श्री. शंकरराव पेशवे, कु. मोहिनी करन्दीकरप्रभृतीनां संस्कृत-भाषणैः दशसहस्र-श्रोतृवृन्दसहकार्येण संपादितम् अभूतपूर्वं यशः संमेलनेन । इत्थमेव प्रतिनगरं भवन्तु संस्कृतसंमेलनानि इति प्रयतन्ते 'शारदा'काराः ।

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

संपादकीयम्

संस्कृतशून्यं संस्कृत-साहित्य-संमेलनम्

१४ फेब्रुवारी १९६८। बुधवासरः। राजधानी दिल्ली। अ. भा. संस्कृत-साहित्य-संमेलनस्य महासमिति-सभा। गृहकार्य-राज्यमन्त्रिणां श्री. विद्याचरण शुक्लानां निवासे। तेषाम् एव साभापत्ये। दक्षिण-भारत-प्रातिनिध्येन केवलम् 'शारदा'काराः तत्र उपस्थिताः। वङ्गीयाः श्री. वेणीशंकर शर्मा महोदयाः। द्वित्राः राजस्थानीयाः। इतरे सर्वे दिल्लीनगरस्थाः। सस्कृत-विद्यापीठ-सेवकाः तत्र बाहुल्येन।

प्रारब्धं सभाकार्यम्। पठितं संमेलनसचिवैः डॉ. मण्डनमिश्रैः स्वीयं निवेदनम्। आयव्ययपत्रके प्रदर्शिता न्यूनता ७५००० सहस्ररूप्यकाणाम्। तदनु समर्पितं साचिव्यस्य त्यागपत्रम्। समाप्तं निवेदनपठनम्।

उपस्थिताः शारदाकाराः स्वाभिप्रायं प्रकटीकर्तुम्। संस्कृत-भाषया। प्रशस्तं तैः सचिवकार्यम्। परम् असंतोषः प्रकटीकृतः संमेलन-कार्यस्य हिन्दीमाध्यमविषये। "यदि संमेलनकार्यालये कर्मकराणां मुखे हिन्दी, पत्रव्यवहारे हिन्दी, सचिवादीनां सभाकार्ये हिन्दी तर्हि किं स्थानं संमेलने संस्कृतस्य? का इयं निष्ठा? किमर्थम् इयं वञ्चना? कथं सह्या इयं प्रतारणा संस्कृतेन?" अत्र समाधानकारकम् उत्तरं नास्ति।

'शारदा'काराणां द्वितीयः प्रश्नः। किमर्थं संमेलनस्य वार्षिकम् अधिवेशनं केवलम् उत्तरभारते? तत्रापि दिल्लीपरिसरे? किमर्थम् इदं केन्द्रीकरणं संमेलनस्य हिन्दीभाषिक-प्रदेशे? किमिति न पदं करोति संमेलनं दक्षिण-भारते?" सचिवः।

"निमन्त्रणं दीयते चेत् अग्रिमवर्षे आगच्छामः।" सचिवः।

"अस्माभिः दीयते निमन्त्रणम्। आगम्यताम्!" —शारदाकाराः

समेलने संस्कृतस्य दुरवस्थां, संस्कृतविषयकं प्रखरनिष्ठाराहित्यं, पूर्वसूरीणां संस्कृतमात्रनिष्ठाविषये विस्मरणम्, अस्मादृशसंस्कृत-व्यवहार-व्रतानां विषये उपेक्षाबुद्धिः, दिल्लीनगरे स्थित्वा यथाकथम् अपि व्यवहरामः को नः प्रष्टा? इति समेलन-चालकानां निरङ्कुशवृत्तिं च अनुभूय सत्यं उद्विग्नं नः मानसम्।

संस्कृतसमेलनकार्यालयात् इत्थम् एव संस्कृतस्य उच्चाटनम्, अव-माननम् उपेक्षा च अनुभूयते चेद् अलं संमेलनेन इत्येव मतिः सुदृढीभवि-ष्यति। न पुनः स्वप्ने अपि सह्यं संस्कृतशून्यं संस्कृत-साहित्यसमेलनम्।

---

* * * श्री शंकर-अकादमी-संयोजनेन अखिल-भारतीय-संस्कृत-साहित्य-संमेलनस्य अधिवेशनं दिल्ली-नगरे १७ मे १९६८ दिने सुनिश्चि-तम्। प्रतिनिधित्वेन तत्र गन्तुकामैः महाराष्ट्र-सदस्यैः १५ मार्च १९६८ पर्यन्तं 'शारदा-कार्यालयः', ४२५ सदाशिवपेठ, पुण्यपत्तनम् २ इति संकेतेन स्वीयं नामाङ्कनं कर्तव्यम्। —वसन्त अ. गाडगीळ

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

पुणें) महाराष्ट्रराज्यशासन-भारतकेन्द्रशासन-पुरस्कृता विश्वप्रिया (मुम्बई
शृङ्गेरी-शारदापीठ-श्री-शंकराचार्यैः संस्कृत-'शंकरकृपा'-त्वेन स्वीकृता

सौर १ चैत्र १८९०

शारदा

संपादकः वसन्त अ. गाडगीळ.

वर्षम् ९ अङ्कः १०

वार्षिकमूल्यम् रू. ५ * अस्य अङ्कस्य रू. ००-४०

॥ राधा ॥

नन्दनन्दनानन्दकरे मधुमन्त्रवेणुरवहतचित्ते
वृन्दावनगतमुकुन्दराधितपादे राधे रासगते ॥
इन्दीवरगतसौन्दर्यश्रीलेखितलोचनसान्द्रमदे ।
कुन्दसुगन्धितरेखितदन्तसुशोभितवदने चेन्दुसिते ॥
शङ्खतुषारस्फटिकविशदशुभहास्यमते परिशुद्धमते ।
धवलकमलसुस्वादुनतलमृदुनवनवनीतसुरसचित्ते ॥
आलक्तककर्चितपदकमले पुष्परागरञ्जितवदने ।
यक्षकर्दमान्वितभाले मधुगन्धविलेपितबाहुलते ॥
अञ्जनशोभितनीरजनेत्रे मञ्जीरान्वितपदकुञ्जे ।
गुञ्जारवयुतपङ्कजमालाधारिणि मञ्जुलहास्ययुते ॥
कुञ्जवने मधुगुञ्जितसदने प्रभुराजितकादम्बवने ।
कोकिलकूजितचूतवने रवितनयापुलिने कृष्णरते ॥
मन्दगन्धकुरुविन्ददलान्वितगोविन्दविभुप्राणगते ।
इन्दुविभायुतसौधतले हरिचन्दनचर्चित-हरिदयिते ॥
शुभकृच्छुभभृच्छुभसामग्र्यापूजितराधितशुभपादे ।
शुभवरदायिनि शुभवरशोभिनि शुभरातिकाणि शुभभणिते ॥
पवनचलितकेशकलापे ह्ययि रम्यकृष्णप्राणेश्वरि हे ।
संततशुभगोलोकविहारिणि प्रीतिरसायनरसप्लुते ॥

'प्रभात' पुण्यपत्तनम् ४ पृ. धुं. भालेराव

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

मोक्षः

(वि. स. खाण्डेकर इत्येषां '**मोक्ष**'-कथायाः संस्कृतानुवादः)

कारागृहस्य महाद्वारेण गुर्गुरायितम् ।
तस्मिन्नेव क्षणे स्तब्धाः सर्वे बन्दिनः ।
उच्चावचं विवदमानाः, करकरायितेन कण्डूयमानाः ।
दीर्घप्रचण्डं तमसः कपाटम् ईषद् इव उन्मीलितम् ।
कृष्णकरालस्य दैत्यस्य जृम्भायां प्रकाशमानाः द्वित्राः इव अग्रदन्ताः ।
सम्प्राप्ताः अस्पष्टदर्शनाः प्रकाशकिरणाः तस्मिन् बन्दीगृहे ।
सर्वैः नेत्रे आस्फाल्य नवागतं द्रष्टुं प्रयतितम् ।
परं न सम्यक् द्रष्टुं समर्थास्ते ।
अस्मिन् तमोगृहे प्राप्तः-अथवा यत्सत्यम् उपढौकितः-मनुजः, तारस्वरेण विलपति, अधिकारिणः प्रतोदस्य प्रहारान् प्राप्नोति ततश्च कराभ्यां मुखं पिधाय, अन्तरागत्य प्ररोदिति, द्वारं च तत् निद्रायामेव कुम्भकर्णेन मुद्रितं मुखकुहरमिव पुनः निमील्यते इत्येव आसीत् अद्ययावत् अनुभवः ।
परम् अद्य तु विपरीतमेव किमपि संवृत्तम् ।
अन्तःप्रविष्टा स्त्री वा पुरुषो वेति न सम्यक् दृष्टम् ।
परं प्रशान्तः आसीत् प्रवेशोऽयम् ।
तस्य सुव्यक्तमधुराः शब्दाः यदा श्रुतिपथम् आगताः,
तदा 'पुरुषोऽयम्' इति विदितं समेषाम् ।
सोऽब्रवीत्–"अधिकारिणः, नूनं कृतज्ञोऽस्मि भवताम् ।
अस्मिन् भ्रातृसमूहे स्थातुम् अनुज्ञातोऽहम्
अति हि नाम वो ऋणी संवृत्तोऽस्मि ।
राजगृहं क्वचित् मानवतायाः कारा भवेत् ।
क्वचित् काराऽपि स्यात् प्रासादः पौरुषस्य ।
विजयताम् मानवः ।"
अन्तःप्रविष्टात् बद्धात् नैव श्रुतपूर्वाः ईदृशाः शब्दाः केनापि ।
सर्वे बद्धाः । चकिताः । स्तिमिताः ।
कुर्कुरायमाणं द्वारं निमीलितम् ।
किञ्चित्कालपर्यन्तं तमोगृहे तस्मिन् विचित्रा शान्तिः प्रसृता ।
ततः कोणात् कश्चित् पीडितः जराजीर्णः स्वरः समुत्थितः ।

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

"भो अभ्यागत, किंनामा भवान् ?"

"—आनन्दः।"

नैके जनाः भीषणं जहसुः।

ततः कोऽपि वृद्धः प्राह—

"किमर्थम् आगतोऽसि अत्र ? पञ्चत्वं प्राप्तुम् ?
नेत्राभ्याम् अत्र केवलं तमःपानं कर्तव्यम्।
दंशमशकपारणात् ऋते नास्ति किमपि कार्यान्तरं हस्तयोः।
आत्मनः एव अत्र मनुजाः उद्विजन्ति।
आत्मानं वर्जयित्वा सर्वेऽप्यन्ये यमायतनं यान्तु।
यतः अन्धकारेऽस्मिन् अविरतं शतपदीं कर्तुं प्रभवामि,
इत्येव मनीषा प्रत्येकस्य।
अत्रस्थः प्रत्येकः अपरस्य शत्रुः।"

प्रशान्तः आनन्दः अब्रवीत्—

"अतथ्यमेतत् !"

वृद्धः सकोपं पप्रच्छ—"कथमिव ?"

—"सर्वेषां सुहृद् इति प्राप्तोऽस्मि अत्र !"

"साधु !" कोणात् कोऽपि कोमलः कण्ठरवः कर्णपथम् आगतः। रवेऽस्मिन् शिशुपदगतकिङ्किणीशिञ्जितं निनादितम् इति अवभासितम्।

"साधु !" कोणान्तरात् द्वितीयः स्वरः आगतः। तस्मिन् स्वरे तावत् गोष्ठं प्रतिनिवर्तमानानां धेनूनां कण्ठघण्टानादः पुञ्जीभूतः इति आनन्दस्य तर्कः।

"साधु !" तृतीयस्मात् कोणात् तृतीयः ध्वनिः समुत्थितः। अयं ध्वनिः गगनचुम्बितः मन्दिरस्य गभीरघण्टाघोषम् अनुकरोतीति तस्य मतिः।

सोत्कः सन् सः अन्धकारे पश्यन् शृण्वन् स्थितः।
परं न केनापि प्रतिश्रुतं तत् स्वरत्रयम्।
विह्वलस्वराः, कण्डूतिध्वनयः, प्रार्थनाशब्दाः,—
इत्यादयः नैके नादाः अन्यान्यं संमिलन्ति।
परं मानवस्य सजीवः शब्दः न कुत्रापि श्रूयते।
ईषद् इव दृष्टम् अन्धकारे।
अकस्मात् आनन्दः सहर्षं प्राह-"लब्धः, लब्धः !"
"कस्तावत् ?"—कोणस्थेन कोपनेन वृद्धेन पृष्टम्।

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

" मार्गः । "
" कस्य ?"
" मोक्षस्य !"
सरभसं सर्वे समुत्थिताः, जगर्जुः च ।
" अपि उद्घाटितं द्वारम् ?
क्षणान्तरे एव तेषां हताशाः शब्दाः श्रवणम् आगताः ।
—" धिक्, पिहितमेव द्वारम् !"
प्रशान्तः आनन्दः प्राह—
" अपि दृष्टः युष्माभिः अत्रस्थोऽयं दृढतुङ्गः स्तम्भः ?"
—" अति हि परिचितोऽयं स्तम्भः !"—वृद्धः उदगिरत् ।
" शतवारं स्खलितं तस्मिन् अस्माभिः।" नकेषां मर्मरध्वनिः।
स्मयमानः आनन्दः अप्रच्छत्—
" अपि कोऽपि भवतां कदापि आरूढः स्तम्भेऽस्मिन् ?"
—" किं नाम फलितं तत्र आरोहणस्य ?
विनान्धकारं किमस्ति अपरम् अस्यां कारायाम् ?"
आनन्दः नैव प्रत्यब्रवीत् किञ्चित् ।
सः स्तम्भसमीपं गतः । दोर्भ्यां स्तम्भं धृत्वा सत्वरम् उपरि उपरि आरुरोह । सर्वः संवेदयति तस्य आरोहणम् ।
मुखम् उद्घाटच एव प्रत्येकः पश्यति ।
आरुरुक्षुः आनन्दः श्रान्तः । सः मध्येमार्गं विश्रान्तः ।
अधस्तात् उत्थितः भीतानां कलकलः ।
" निपतिष्यति अयम् अधुना । छिन्नभिन्नो भविष्यति ।
उत्तिष्ठध्वम् । पलायध्वम् । कोणं साधयथ ।
नो चेत्, अस्माकम् एव शीर्षे पतिष्यति ।"
आनन्दः पुनः ऊर्ध्वम् आरुरोह । उच्चम्, अत्युच्चं प्राप ।
तस्य आकृतेः अस्पष्टोऽपि चरमकणः पारेनेत्रम् प्रयातः ।
अकस्मात् उपरिष्टात् तस्य विजयध्वनिः समायातः ।
—" पश्यत-पश्यत, तत्रस्थे कोणे प्रकाशः दृश्यते !"
अधःस्थिताः प्रायशो बन्दिनः उपहसन्ति ।
न ते क्वापि किमपि पश्यन्ति ।
पुनः श्रवणमागतः आनन्दशब्दः-" स्तम्भेऽस्मिन् रज्जुरस्ति बद्धा!"
" मा स्यात् रज्जुः । सर्पः स्यात् । "
" रे मूर्ख, सम्यक् अवधारय । नो चेत्, वृथा मरिष्यसि !"

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

—भूतलात् नैके शब्दाः समुत्थिताः ।
तां रज्जुं दृढं समालम्ब्य आनन्देन सुदूरं दोलायितम् ।
तस्मात् सः गवाक्षम् एकं प्राप्तः ।
महद्दीर्घं गवाक्षम् । तस्य केवलः दण्डः । स एव हस्तसात्कृतः तेन ।
सर्वेऽपि उद्ग्रीवाः अवलोकयन्ति । परं न लेशमपि द्रष्टुं पारयन्ति ।
ऊर्ध्वगतः आनन्दः शिशुरिव चुक्रोश-
"अहो! कोऽयम् अत्र उल्लासः !
नभसः नीलकान्तं प्राङ्गणम् ।
तस्मिंश्च प्रतिपर्णं प्रवृत्तं प्रकाशस्य नर्तनम् ।"
—"अतथ्यमयं शंसति । पुष्पितवाचा वञ्चयति जनान् ।"
—अधस्तात् शब्दाः समीरिताः ।
ऊर्ध्वस्थः आनन्दः प्राह—
"न खलु, न खलु । नूनमिदं नीलनभः । यत्सत्यं शुभ्रः प्रकाशः ।
आरोहत, आरोहत तस्मिन् स्थाणौ ।
गृह्णीत तां रज्जुम् । ताम् आश्रित्य इत आगच्छत ।
पश्यत इमे पक्षिणः कथं सानन्दं---"
कोणात् कोऽपि प्रधावति स्तम्भसमीपम् ।
सर्वे बद्धाः आक्रोशन्ति—
—"भोः रुन्धन्तु तां मुग्धाम् । निगृह्णन्तु ताम् ।
दिवान्तं यावत् नवरं गायति ।
कथङ्कारम् इयं पारयेत् तत्र आरोढुम् ?"
स्तम्भसमीपात् मञ्जीरशिञ्जितानुकारी नादः निःसृतः—
—"सत्यं यत् आनन्दः कथयति । इतो बहिर्विभाति गगनगृहम् ।
अवलोकयत तत् तस्य सुनीलं वितानम् ।
तानि तस्य प्रकाशद्वाराणि ! ताः-ताः पुष्पिताः वाटिकाः !
—"तूष्णीं भव, मूढे !"
स्तम्भस्य निकटवर्तिनः पञ्चषाः तां निवर्तयन्तः गर्जन्ति ।
कोणान्तरात् 'गोकण्ठघण्टारवः' श्रवणायतनम् अवतीर्णः ।
—"मुञ्चन्तु ताम् । न सा मूढा । यत्सत्यं यूयमेव मूढाः ।
यस्य अन्तरङ्गे प्रकाशः नास्ति, तस्य किं नाम बाह्यप्रकाशेन ?"
पञ्चषाः जनाः आक्रोशन्ति,
—"प्रथमं पिधत्त श्मश्रुलस्यास्य तुण्डम् ।
अविरतम् आरटन् आस्ते ।
न तत्र अवाक्षरमपि आकलयितुं शक्नुमः ।

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

ननु 'आत्मनः आवाहनं, अन्तःस्थः प्रकाशः, अनन्तस्य तृष्णा,'
इत्येव किमपि किमपि रटति।"

कोऽपि विहस्य प्राह,

—"परिणाययत एनम् अनया मूढया !
शोभनं भवेद् अनयोः युगलम्।"

सन्मुखात् कोणात् 'मन्दिरघण्टाघोषः' समायातः।
—"न खलु उन्मत्तः सः। यूयम् एव उन्मत्ताः।
तमन्तरेण इदमस्माकं जीवनं नूनमसह्यं भवेत्।
आगच्छत। स्तम्भे आरोहत। रज्जुम् आलम्बत।
यदि गवाक्षाद् बहिः पदं कर्तुं प्रभवाम,
तर्हि अकुतोभयाः स्याम।
शशाङ्कं गच्छाम। शुक्रं प्राप्नुयाम।
ईदृशे प्रदेशे प्रविशाम, यत्र न अस्मान् स्पृशेत् कस्यापि सत्ताधीश-स्याज्ञा !"
—"अयं तु सप्तकृत्वः मूर्खः प्रतिभाति।"
सप्तकोटिके अट्टहासे विलुप्तोऽयं नैकेषाम् अभिप्रायः।
अत्रान्तरे बन्दीशालायां प्रवेशद्वारं खाट्कृत्य उद्घाटितम्।
प्रथममेव अद्य तत् संपूर्णम् उन्मीलितम्।
स्वच्छाच्छोदतोयवत् प्रसन्नः प्रकाशः अन्तः प्रविष्टः।
द्वारस्थः अधिकारी उच्चैः अवदत्—

"आनन्दवार्तां वो दातुं संप्राप्तोऽस्मि।
युष्मासु क्रुद्धः आसीत् सम्राट्।
समेषां शिरश्छेत्तुम् आज्ञप्ताः वयम्।
परम् अधुना वः सदयःसञ्जातः राजाधिराजः आदिशति,
—'युष्माकं कोऽपि बन्दी यदि बलिरूपेण पुरः सरेत्,
तर्हि सन्तुष्टः स्यात् सम्राट् तेनैव।'
"तमेव एकं बन्दीग्राहं गृहीत्वा मोक्ष्यामि अहम् अन्यान् सर्वान्।"

"मोक्षः ! मोक्षः ! मुक्तोऽहं भविष्यामि ! विमुक्तं विचरिष्यामि !"
—इत्यादिभिः शब्दैः निनादिता बन्दीशाला।
नेके बद्धाः गानोन्मुखाः! कतिपये नृत्योद्यताः।
वृद्धबद्धः तारस्वरेण साधिकारिणम् उवाच

"पश्यतु तं गवाक्षगतं देवानां प्रियम्। ननु तमेव नयतु भवान्।"
—"मा, मा तं नयतु। मामेव नयत।"-इति 'मञ्जीरशिञ्जितम्।'
—"मा खलु तं पीडयत। अहमेव यास्यामि।

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

—इति 'गोकण्ठघण्टानादः"।
—"अहम् आगच्छामि। ननु अयम् आगतोऽस्मि!"
—इति 'मन्दिरघण्टाघोषः'।
क्षणमेकं विचित्रा निःशब्दता रराज।
प्राक्सृष्टिसर्जनाद् इव।
ततश्च अधिकारी अब्रवीत्-
"इमे त्रयः, गवाक्षगतश्चासौ चतुर्थः,
एतैरेव मया सह बहिर्यातव्यम्।
चत्वार एष एते मुक्ताः।"
"किमेतत्?" बहुभिः सकरुणं पृष्टम्।
—"तथा आज्ञापयति महाराजः!"

हार्वर्ड-विद्यापीठम् सौ. विद्युल्लेखा अशोक अकलूजकर (वाघ)
अमेरिका

---

* *

रूप्यकाः ३२५००

'लिट्ल्किझ्' (क्र. ३०) पारितोषिकम्

पठ्यन्तां विशेषाः प्रमुखेषु रविवासरीयेषु आङ्ग्लवृत्तपत्रेषु।
कूटानां संस्कृतानुवादः प्रवेशपत्रिका च
अनयोः विनामूल्य-लाभार्थं प्रार्थ्यताम्—

लिट्ल्किझ् प्रायव्हेट लिमिटेड
अलङ्कारः, बालाराममार्गः, मुम्बापुरी ७

* *

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri



सोलापूर-संस्कृत-संमेलने संयोजकः –पं. वसन्त अ. गाडगीळ, उद्घाटकः –डॉ. मॅथ्यू रायनर लेदर्ले, श्री. रामजी शामजी, अध्यक्षः –डॉ. हरि रामचन्द्र दिवेकरः

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

समाजजीवने संस्कृतस्य आवश्यकता ।

(सोलापूर-संस्कृत-संमेलने भाषणम्)

भारतस्य प्राचीना परंपरा धीरोदात्ता विचारसंपद्, गगनस्पर्शी च आध्यात्मिकी आकाङ्क्षा, विशाला संस्कृतिः, भारतस्य स्वत्वं च संस्कृत-वाङ्मये प्रतीतयते । अस्माकं सर्वे संस्काराः संस्कृतमेवाधिकृत्य क्रियन्ते इति ख्यातमेव । संस्कृतवाणी अस्माकं स्फूर्तिस्थानं, राष्ट्रस्य च संजीवनी, इतिहास-कला-भाषाशास्त्र-धर्मविज्ञानार्थशास्त्र-गणितगदचिकित्सा- इत्यादिषु सर्वेषु ऐहिकेषु पारलौकिकेषु च विषयेषु साद्यन्तं विचारं प्रकटीकुर्वाणाः ग्रन्थाः संस्कृते एव । न संस्कृतसाहित्ये केवलं भारतीयानाम् अपि तु सर्वस्याः एव मानवजात्याः अमूल्यं धनम् । भारतरामायणादि-संस्कृतगन्थान्तर्गतानां नैतिकमूल्यानाम् अध्ययनेनैव विनयावहा शिक्षा अस्माभिरभिगम्यते ।

भारतीयजीवने एकतायाः एकराष्ट्रीयत्वस्य च सूत्रं संस्कृतगिरा एव प्रकटीकर्तुं शक्यम् । तथा च कदाचित् सांस्कृतिकम् एकीकरणं कर्तुं शास्त्रीयज्ञानसंपादनार्थं च संस्कृत-भाषामेव अखिल-भारतीय-भाषां उपयुञ्जन्ति स्म । यथा विख्याताः आयुर्वेदरचयितारः, भारतीयलेखकाः च यद्यपि विविधे काले विविधेषु च देशाङ्गेषु जाताः तथापि तेषां ग्रन्थरचना तु संस्कृत एव कृतां पश्यामः । तथा च पूर्वसूरिभिः कृतायां ग्रन्थरचनायां ज्ञानमन्दिराणि संस्कृताधारेणैव बद्धानि दृश्यन्ते । चरकः पञ्जाबप्रान्ते प्रादुरभूत् । सुश्रुतः वाराणस्यां, वाग्भटः सिन्धुप्रदेशे, वृन्दः महाराष्ट्रे, चक्रपाणिर्वङ्गेषु, शार्ङ्गधरः राजस्थाने, विष्णुदेवः विजयनगरे तथा च नरहरिः काश्मीरे, इत्येते विविधविषयशास्त्रिणः देशान्तरेषु कालान्तरेषु च समभूवन् प्रबभूवुश्च । उत्तरे काले सर्वैरपि वाक्सूरिभिः स्वप्रतिभायाः घटाः संस्कृतस्यैव अक्षीणे निर्झरे पूरिताः । तथा च संस्कृत-शब्दकोशस्यैव बलेन विविधाः देशभाषाः वैभवसंपन्नाः आसन् ।

संस्कृतभाषायाः अध्ययनम् एभिरपि कारणैः आवश्यकं भवति । यैः अस्माकं भारतस्य संस्कृतिविशेषः घटितः ते रामायणमहाभारतादयः ग्रन्थाः संस्कृतभाषया एव विरचिताः । आदेवतात्म-सेतुपर्यन्तं सर्वेष्वपि देशाङ्गेषु एते ग्रन्थाः पूज्याः । महाभारततः एव शिवरायः स्वराज्यस्थापने स्फूर्तिं प्राप्नोत् । प्राक् पञ्च वा सप्तसहस्त्रसंवत्सरेभ्यः जाता अद्यावधि कालेऽपि च वैभवेन जीविता का अन्या भारतीयसंस्कृत्या विना स्यात् जगतीतले ? एतस्याः प्राचीनायाः संस्कृत्याः आधारभूम्यामेव वयं नवीनं समाजमन्दिरं निर्मातुम् उद्युक्ताः । भूतपूर्वाः अग्रिम-प्रधानमन्त्रिणः पण्डित-

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

जवाहरलालाः कदाचित् उक्तवन्तः यत् का खलु भारतस्य सर्वाधिकं दैवी संपत् ? किं च सर्वोन्नतं पारंपरिकं वैभवम् ? इत्यहं पृष्टश्चेत् संस्कृतभाषा वाङ्मयम् अनयोश्च विचारधनमेव इति निश्चितं ब्रवीमि। यावत्कालपर्यन्तम् इदं श्रेष्ठं पारंपरिकं वैभवं स्थास्यति तावत्पर्यन्तमेव भारतस्य संस्कृतिः चिरस्थायिनी स्यात्।

संस्कृताध्ययनस्यापरं कारणं सा भारतस्य धर्मभाषा। सर्वेषामपि देवदेवतानां पूजनम्, अर्चनं, हवनं, व्रतानि च संस्कृत एव। अस्माकं तिथयो वासराश्चापि संस्कृतनामभिरेव ज्ञायन्ते। तथा स्वर्गतैः बङ्किमचन्द्रैः विरचितं ख्यातं राष्ट्रगीतं वन्देमातरम् अपि संस्कृत एव। अस्मच्छासनेन स्वीकृतानि 'शं नो वरुणः' 'सत्यमेव जयते,' 'योगक्षेमं वहाम्यहं,' 'बहुजनहिताय बहुजनसुखाय,' इत्येतानि वचांसि वदत कया भाषया घटितानि ? अद्यतने काले महाराष्ट्रशासनेन निर्मितस्य पदनामकोशस्य कथयत कः खलु प्रथमः आधारः? महाराष्ट्रीसदृश्यां भाषायां पञ्चाशीति-प्रतिशतं शब्दाः संस्कृतोद्भवाः एव सन्ति।

संस्कृतभाषायाः प्रत्ययघटितत्वात् एकेनैव शब्दाधारेण अनेकानां नवीनानां शब्दानां निर्मितिः शक्या। अतः एव उच्यते संस्कृतभाषा प्राचीनानां प्राचीना नवीनानां नवीना इति। आनगाधिराज-दक्षिण-सिन्धुपर्यन्तं सर्वेषामपि व्यवहाराणां मूले एका एव संस्कृभाषा अनन्या च संस्कृतिर्दृश्यते। वङ्गेषु, गुर्जरेषु, मद्रदेशेषु, उत्तरप्रदेशेषु वा यत्र क्वापि भ्रमितुकामान् वः संस्कृतज्ञाः प्राप्स्यन्ति। अज्ञातेष्वपि युष्मासु ते युष्माभिः साकं संस्कृतभाषया व्यवहर्तुं समर्थाः। अनेन विचारेण वक्तुं शक्यते यत् संस्कृतभाषा शिष्टानां राष्ट्रभाषा एव। यतः अस्मद्राष्ट्रस्य इतिहासस्य संस्कृतेरपि संस्थापनं संस्कृतभाषायाम् एव।

किं बहुनोक्तेन ? गम्यतां कमपि लोहमार्गस्थानकं तत्र भवद्भिरिद-मेव प्रेक्ष्येत यद् यत्र तत्र सामिषं निरामिषं वा भोजनालयं 'प्रतीक्षागृहम्' इमानि एतादृशीनि वा स्थाननामानि दृश्यन्ते। नवीनासु पत्रमुद्रासु च 'द्वे रूप्यके,' 'पञ्चरूप्यकाणि' 'शतं रूप्यकाणि' इत्यपि संस्कृते निर्दिष्टं दृश्यते। अहो राजमान्यता संस्कृतस्य!

अनेन मार्गेण विचारवताम् अस्माकमद्यावधि काले संस्कृताध्ययनेन किं सिध्यति, इति उक्तं चेत् इदमेव वक्तुं मे मनः प्रवर्तते यत् संस्कृता-ध्ययनेनैव विद्यमानां राष्ट्रभाषां हिन्दीं सुलभत्वेन पठितुं समर्थाः स्याम। संस्कृतभाषया च विविधाः देशभाषाः समृद्धाः संपन्नाश्च भवेयुः। अस्मद्-राष्ट्रविषयकः संस्कृतिविषयकश्च यथार्थः अभिमानः मर्नास संपद्येत। भारतीयं तत्त्वज्ञानं, साहित्यं चेत्यनयोः सम्यक् परिचयः भूयात्। भूतकालं

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

भाविकालं च सम्यक् ज्ञातुं शक्यं स्यात् ।

संस्कृतज्ञानेनैव मातृभाषाणां सत्यार्थेन प्रगतिर्भूयादिति दृढं विश्वसिमः । वयमिदमपि वक्तुं समर्थाः यत् संस्कृतभाषा एव सर्वासाम् भाषाणां प्राणाः । यदि अस्मद्राष्ट्रभाषा आन्तरप्रान्तीयां प्रगल्भतां प्राप्तुमिच्छति तर्हि तस्याः शब्द-वैक्लव्यं संस्कृत-शब्द-कोशतः एव निःसरेत् संस्कृतभाषायाः साहित्यं बहुविधं च उपकारकं च भवति ।

एतद् च सर्वं प्राप्तुं इदमेव वरं यत् संस्कृतभाषा प्रशालायाम् एव सम्यक्तया अध्यापिता स्यात् । तत्र च तस्याः अपरिहार्यत्वं कल्पितं चेत् नात्युक्तिः भवेत् । अतः विविधैः समाजपुरुषैः, राजकीयपक्षनेतृभिः शिक्षाशास्त्रविद्भिः भाषाशास्त्रविद्भिः प्राध्यापकाध्यापकैः शिक्षणसंस्थाप्रमुखैच सर्वैरपि सर्वात्मना यतितव्यं संस्कृतभाषोन्नत्यै इत्यलम् ।

स. हि. ने. प्रशाला
सोलापुर-१

मोहिनी करन्दीकर

स्मर्यताम् राष्ट्रदेवो भव स्वर्यताम्

राष्ट्ररक्षणार्थम् .... बलसंवर्धनम्
बलसंवर्धनार्थम्....... मिष्टान्नसेवनम्

सर्वोत्कृष्टमिष्टान्नार्थं सत्वरं द्रष्टव्याः

दूरवाणी] शर्मा स्वीट मार्ट [७२३२
दत्तमन्दिरसमीपे पुणे२.

कृपया सत्वरं प्रेष्यतां शारदा-वार्षिक-मूल्यं रू. ५=००

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

शिवराज्योदये दृष्टिः

शारदा वरदा देवी वर्णेकर ! महाकवे !
त्वयि दृष्टा मया पुण्ये वसन्ते शारदालये ।।

सिद्धरामनाथकथाप्रकाशैकप्रसङ्गतः ।
संस्कृतस्यैकसम्बन्धाद् वसन्तेनास्मि सङ्गतः ।।

जगन्नाथान्तमाचख्युर्जनाः संस्कृतवाङ्मयम् ।
अम्बिकादत्तगद्यान्तं केचिदन्ये जगुर्जनाः ।।

शिवराज्योदयं दिव्यं नव्यं भव्यं विभाव्य तु ।
काव्यमव्याकुलं लोको दिव्यानन्दं भजिष्यति

काव्य-प्रकाश-कार्येऽपि कृता शारदया दया ।
वसन्त इव सोल्लासो वसन्त इह तत्परः ।।

महाराष्ट्रधरा धीरा जिजाबाई सुजीवना ।
नैतिकेन चरित्रेण शौटीर्येण गरीयसा ।

शिवधर्मा शिवौजस्कः समर्थेन समर्थितः ।
अराजगृहजातोऽपि शिवराजो व्यराजत ।।

महाराष्ट्रभटैर्भीमो भवान्या भीष्मतां भजन् ।
शिवराजयशोमूर्तौ भूषणो भूषणायते ।।

व्यासेन व्यासतां नीतो विजयः शिवराजजः ।
वर्णेकरकविं प्राप्य लब्धवर्णन्तु वर्णने ।।

वारणाकरतां यातो वरुणालयतां गतः ।
किन्तु कव्योर्द्वयोरेतदन्तरं दृश्यते महत् ।

चतुरङ्गुलदूरेऽपि भेदो व श्रुतिनेत्रयोः ।
व्यासोऽसावम्बिकादत्तो राजस्थानेऽस्य जन्मभूः ।।

अटाटचा पूर्ववङ्गेऽपि विहारे च निवासभूः ।
व्यासो गद्यकविः ख्यातः शिवराड्विजयः कृतिः ।।

नीत्वा भागवतादीनां पद्यखण्डं प्रसङ्गतम् ।
दरभङ्गानरेशस्यादेशतो देशसेवकः ।।

दशवर्षावधिं व्यास इतिहासं बबन्ध सः ।
तथापि संस्कृते पूर्वमाङ्ग्लानां समये भवन् ।।

ऐतिहासिकमालम्ब्य विषयं तद् विशिष्यते ।
किन्तु वर्णेकरः साक्षान्महाराष्ट्रधरासुतः ।।

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

शिवराजजन्मभूमिं कर्मक्षेत्रं पवित्रकम् ।
महाराष्ट्रं हि पर्यटच्य यात्रया कष्टया स्वयम् ।।
संघटय्य श्रृङ्खलेन प्रत्येकं घटनाक्रमम् ।
स्वयं भूगोलमालोक्य सेतिहासजनश्रुतिम् ।।
विषयं विषयीकृत्य चक्षुषो: कर्णयोर्धियः ।
सर्वाङ्गीणतया वर्ण्यं वर्णकर-महाकविः ।।
कस्याप्यादेशनिर्देशलेशदोषविवर्जितः ।
स्वान्तःसुखाय कर्तव्यं मत्वा लिखति साम्प्रतम् ।।
राष्ट्रसेवा जातिसेवा धर्मसेवा विधीयते ।
पुण्या संस्कृतसेवा च वीरपूजनपूर्वकम् ।।
महाराष्ट्रभुवो भाषामाचारं वेषभूषणे ।
सामाजिकं राष्ट्रियं च तत्त्वं वेत्ति स मूलतः ।
भावना व्यवहाराश्च नवराज्योदये यथा ।
भवन्ति भव्यया शैल्या वर्णैर्वर्णकराङ्कितैः ।।
स्वभावोक्तिमयैः पद्यैर्महाराष्ट्रस्य चित्रणम् ।
क्वचिदर्थान्तरन्यासा ध्रुवं व्यासातिशायिनः ।।
भौगोलिक्यां भूमिकायामैतिहासिकमन्दिरम् ।
शिवराज्योदयं भाति शिवराज्योदयोचितम् ।।
सभ्यता शिष्टतोत्कृष्टा महाराष्ट्रस्य दर्शिता ।
नायके शिवराजे या सास्तु सर्वत्र साम्प्रतम् ।।
राज्यं जयपुरेशस्य काशिराजस्य शासनम् ।
दरभङ्गानरेशस्य श्रेष्ठिनां भवनानि च ।।
अम्बिकादत्तदृष्टानि वैशिष्टयेन विभान्ति हि ।
किञ्च वर्णकरस्यास्मिन् वर्णसौष्ठववर्णने ।।
क्वापि सामन्तभावस्य लेशमात्रं न लभ्यते ।
साहचर्यं मतं प्रायो नायकेन कवेः सदा ।।
अभिधयाऽभित्तेऽसौ व्यासो यच्च विशेषतः ।
व्यनक्ति व्यञ्जना वर्ण्यं वर्णकरकवेस्तु तत् ।।
क्वचित्तु कल्पितं पात्रं व्यासकाव्ये विभाव्यते ।
ऐतिहासिकपात्राणि वर्णकरकृतौ स्फुटम्
खण्डमेकं जगौ व्यासः शिवराजस्य जीवने ।
वर्णकरकविः सर्वं वर्णयत्यनुषङ्गतम् ।।

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

शिवराज्योदये काव्ये शिवराजो हि नायकः ।
अवरङ्गादयो नैके सन्ति ते प्रतिनायकाः ।।
अङ्गी वीरो रसः स्पष्टोऽङ्गानि सर्वे रसाः परे ।
परन्त्वश्लीलता नास्ति सभ्यकाव्यं विराजते ।।
धर्ममूला नीतिशाखा स्फुटा राष्ट्रिय-भावना ।
फलं राष्ट्रस्य निर्माणं काव्यकल्पे विलोक्यते ।।
महाकाव्यमिदं नव्यं नव्यो वर्णकरः कविः ।
महाकविपदेनैव मया सम्बोध्यते शिवम् ।।
प्रारूपशोधनविधौ मम बुद्धिमध्ये,
सर्गद्वयस्य हि निसर्गमनोहरस्य ।
आरूढमेतदधुनैव भणामि पद्यैः
वर्णेकराशु मम वर्णय वर्णनीयम् ।।
कर्णाली पादमूले प्रवहति सरयू मानसादुल्लसन्ती.
मौलौ कैलास-तुल्ये हिमवति महती मालिका मालिकास्ते ।
लालू-ग्रामो ललामप्रकृतिरभिमता जन्मभूमी मदीया
माता गौरी पिता मे ललित इति गुरुः क्षिप्रनाथो यतीन्द्रः ।।३७।।

'शारदा', पुण्यपत्तनम् २. योगी नरहरिनाथः

राष्ट्रदेवपूजनार्थं बलोपासनम् । बलोपासनार्थं सात्त्विकान्नसेवनम् ।

तदर्थं त्वर्यताम्

काका हलवाई

१ दत्तमन्दिरम्, शुक्रवार-पुणें २ २ डेक्कन-जिमखाना, पुणे ४.
दूरवाणी ५७८६८ दूरवाणी ५७८६७

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

सांप्रतिकः स्वाध्यायशब्दार्थः

गतान्तरिते शारदाङ्के नैकविद्यासु प्राच्यप्रतीच्योभयविधप्रणाल्या कृतभूरिपरिश्रमाणां डॉ॰ वैद्योपाह्वपरशुरामशर्मणाम् दीक्षान्तोपन्यास-मध्यायमध्यायं महती विचारधारा चिराय मे चेतसि परिवर्तमाना आसीत् । अहं च सर्वानेव प्राचीनविद्यासु द्रढीयः श्रद्दधानान् अधीतिनः पण्डितप्रवरान् सप्रश्रयं साञ्जलिबन्धं च प्रार्थये यत् तत्रभवद्भिः वैद्य-महोदयैः तत्रोपन्यासे अकृत्रिमेण स्नेहभावेन समर्थितः स्वाध्यायशब्दार्थः अवश्यमेव द्रष्टव्यः श्रोतव्यः मन्तव्यः निदिध्यासितव्यः अनुष्ठातव्यश्च ।

पण्डितवरेण्याः डॉ॰ वैद्यमहोदयास्तावदुभयविधायां विद्वत्परिषदि प्रथितवैदुष्याः उभयोरपि प्राच्यप्रतीच्याध्ययनसरण्योर्गुणदोषकलापं चिराय संचिन्त्य तच्चिन्तनसाररूपं यत् उपन्यास्थन् तद्यदि यथोचितमनुष्ठितं स्यात् तर्हि तद् विशिष्य प्राचीनविद्यापरम्परायाः महते उपकारायालं भवेद् इति निश्चप्रचम् आशासे ।

साम्प्रतं प्राचीनशिक्षाप्रणाली पिपतिषन्ती अथवा मुमूर्षन्तीव प्रतिभासते । तस्याः व्याधिनिदानं तत्रभवद्भिः वैद्यमहाभागैः नितराम् अप्रमत्तं कृतम् । तत्र व्याधिहारिणी भेषजयोजना प्रस्तुता, पथ्यदर्शनमपि समुचितं विहितं, तन्मन्ये ‘ वैद्य ’ इति उपाख्या यत् सत्यम् अन्वर्थतां नीता तैः इति ।

शास्त्रीयग्रन्थेषु भाषाकाठिन्यं जातुचित् पुराकाले तत्कालीनायां विशेषपरिस्थितौ सर्वथा अपरिहार्यं केषांचन मते भूषणावहमपि, सार्व-जनीनशिक्षाप्रचारबहुले सांप्रतिके काले विद्यापरंपराया हानिकरमेव, ग्रन्थलाघवप्रेमाणं सर्वथा दूरीकृत्य ग्रन्थगौरवभयशङ्काम् अपि निरस्य यथा समेषां सुबोधकरं तथैव शास्त्रीयविषयविवेचनं नूतनैः शास्त्रिवरेण्यैः संपादनीयमिति तेषामभिप्रायः प्रामाणिकः श्रेयस्करश्च ।

अर्थज्ञानपूर्वकं वेदानामध्ययनं, नूतनानां रसायनपदार्थविज्ञाना-र्थशास्त्रादीनामपि स्वाध्याये समावेशः, नूतनपरिभाषाशास्त्रविदां कुलं शरणीकृत्य नूतनसंज्ञापरिभाषासमाश्रयणम्, प्राकृतभाषाणामध्ययनम्, मातृकाशास्त्रविभागस्य प्रतिष्ठापना इत्यादयः सांप्रतिकाः नैके विषयाः स्वाध्याये अन्तर्भाव्याः, न केवलं स्वपरंपरागतवेदविभागस्य शाखा एव स्वाध्याय इति अभिमन्तव्यम् इति यत् डॉ॰ वैद्य महाभागैः स्वोपन्यासे समर्थितं तन्मन्ये, प्राचीन-विद्या-परम्परायाः सांप्रतिकीं दुवरस्थामपहन्तुं तस्याः समुत्कर्षं च साधयितुं सर्वथा प्रभवेत् तदनुष्ठानम् ।

तदेवं सर्वथा अनवद्यस्य श्रेयस्करस्य चास्योपन्यासस्य केषुचनांशेषु विभिन्नं प्राचीनानां प्रामाणिकमभिप्रायं केवलं वस्तुभूतार्थं जानन्तु वाचका इत्येव संक्षेपेण पुरःस्थापयितुं प्रवर्तेऽत्र, न पुनः पुरोभागितया इति संप्रार्थ्य सप्रश्रयं प्रस्तौमि तं शास्त्राभिप्रायम् ।

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

'असाधुशब्दः यद्यपि अर्थं बोधयति तथापि स साधुशब्दव्यवहित एव अर्थं बोधयति नान्यथा इति तेषां (वैयाकरणानां) सिद्धान्तः' इत्यत्रोपन्यासे निर्दिष्टः सिद्धान्तः शास्त्रान्तरीयः व्याकरणशास्त्रग्रन्थेषु केवलं संगृहीत इत्येवावगन्तव्यम्। यतः महाभाष्यकारम् आरभ्य नागोजी भट्टान्तं सर्वे आकरटीकाग्रन्थकाराश्चैकमत्येन संगिरन्ते यत् 'समानायामर्थावगतौ शब्दैश्चापशब्दैश्च ...' (पस्पशा) 'अर्थप्रत्यायनाभेदे ...' 'वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः' (वाक्यपदीय १.२७, ३.३.३०) 'विनिगमनाविरहाद्भाषायामपि शक्तिः, न चोक्तं गौरवम् संस्कृतवन्महाराष्ट्रभाषायामपि शक्तेर्दुष्परिहारत्वात्' (वैयाकरणभूषणे शक्तिनिर्णये रङ्गोजीभट्टः) 'सा च शक्तिः साधुष्विवापभ्रंशेष्वपि, शक्तिग्राहक-शिरोमणेर्व्यवहारस्य तुल्यत्वात्' (लघुमञ्जूषायां नागोजीभट्टः)-अतः डॉ. वैद्यमहोदयैः स्वीये उपन्यासे उल्लिखितम् 'एवं साधौ...' इत्यादिकारिकाद्वयम् अपि शास्त्रन्तरीयमतस्य संग्रहपरं न तावद्व्याकरणशास्त्रस्य स सिद्धान्तः। वाक्यपदीयकारः केवलं संग्रहैकरुचिः बहुत्र यावन्ति संभवन्ति मतानि तावन्ति कृपणो धनानीव संचिनोति, न तत्र मनागपि चिन्तयति स्वकीयं परकीयम् अर्हमनर्हं युक्तमयुक्तं वेति।

यच्चाग्रे उपन्यस्तम् 'अपारोयं शब्दराशिः सर्वेऽपि शब्दाः स्वयमेवार्थप्रत्यायकाः, तत्र साधुत्वासाधुत्वमीमांसा नैव घटते' इति। केवलशब्दप्रामाण्याश्रयां प्राचीनां, यथायथं प्रत्यक्षादीनि बहूनि प्रमाणानि आश्रितां वा नवीनां शास्त्रसरणिं, व्यवहारे व्यवस्थां च प्रमाणीकृत्य अवश्यं भूयिष्ठं च विमर्शार्होऽयं विषयः।

अत्र विषये प्राचीनसूरिभिः बहु पराक्रान्तम्। 'नानर्थिकामिमां कश्चिद् व्यवस्थां कर्तुमर्हति (१.२९) इत्यादिना प्रबन्धेन वाक्यपदीयकारः भूयः समर्थयते तामेव मीमांसाम्, अन्येऽपि शास्त्रकाराः न्यूनाधिकभावेन तमेव सिद्धान्तमनुसरन्ति। सर्वथा अव्यवस्थां परिहर्तुकामेनाकामेनापि प्राचीनेनेव नवीनेनापि विदुषा सा मीमांसा अङ्गीकर्तव्यैवापतति, अन्यथाकारं न कश्चिदपि व्यवहारः व्यवस्थितिमासादयेत् इति ते प्राचीनशास्त्रकाराः अभिप्रयन्ति।

डॉ. वैद्यमहोदयैः प्रदर्शितेन सामयिकेन पथा एव संस्कृतविद्यायाः समुत्कर्षो भवेत् यदि स पन्थाः श्रद्दधानैः अवहितैश्च चिरमनुसृतः स्यात् प्राचीनशास्त्रिभिः। 'स तु तत्र विशेषदुर्लभः सदुपन्यस्यति कृत्यवर्त्म यः' इति महाकविभारवेरुक्तिमनुसृत्य विशेषदुर्लभेभ्यः तेभ्यः हृदयतो धन्यवादान् वितीर्य उपसंहरामि मदीयमभिप्रायम्।

टिळकविद्यापीठम्, पुण्यपत्तनम् २ —वा. बा. भागवत

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

१४।२।१९६८

आयुष्मते गिरीशाय स्वस्ति ।

श्री. अटलबिहारी वाजपेयी निवासस्थाने दृष्टाः दिल्ली-संघ-नेतारः श्री. ओक वसन्तरायाः । गतवर्षे तैः वेदमहर्षि-शतजीवि-पं. श्री. दा. सातवळेकराणां दिल्लीनगरे सत्कृतिविषये बहु संकल्पितम् आसीत् । तद्विषये पृष्टे निवेदितं तैः " १४ एप्रील ६८ दिने दिल्लीनगरे भव्य-समारोहे सर-संघ-चालक पू. गुरूजी-संन्निधाने सत्करिष्यन्ते पण्डित श्री. सातवळेकराः " इति । सत्कारेण कथं भाव्यम् निधिः अपि कश्चन समर्पणीयः, स्मरणिकाप्रकाशनं सम्यक्तया भवतु, सर्वपक्षीयस्तरेण समा-रोह-सयोजनम् अस्तु इति मामकीनाः सूचनाः श्राविताः मया चर्चायाम् । तैः सादरं स्वीकृताः ताः । मया सर्वात्मना सहकार्यं प्रतिश्रुतम् । पण्डि-तजी सातवळेकराणां सत्कृतिः भारतस्य सर्वासु प्रादेशिक-राजधानीषु भवतु इति मे मतम् । तदर्थं संप्रति प्रयतनीयम् ' शारदा '-कारैः ।

अटलबिहारी-निवासात् भारतशासनेन नूतनं विरचितं 'शास्त्री'-भवनं प्रविश्य तत्र शिक्षाविभागे साक्षात्कृताः संस्कृत-विशेषाधिकारिणः डॉ. रामकरण शर्मा महोदयाः । मधुररसनाः, सरलस्वभावाः डॉ: शर्मा-महोदयाः पुनः प्राप्ताः सन्ति संस्कृतविशेषाधिकारिपदे । महाराष्ट्रराज्ये संस्कृतपाठशाला-दुरवस्था विषये परिचायिताः ते मया । महाराष्ट्रराज्य शासनम् अनुदानार्थं प्रार्थनापत्राणि न पुरस्करोति इत्यपि निवेदितम् । सर्वे पाठशालाचालकाः प्रार्थनापत्राणि दिल्लीं प्रति प्रेषयेयुः चेत् (राज्य-शासन-माध्यमं विना) कृपया स्वीक्रियन्ताम् इत्यपि प्रार्थितम् । "अवश्यं यद् युक्तं तत् करिष्यामि " इति डॉ. रामकरणशर्मा । 'शारदा' संपादन-विषये अपि मार्गदर्शनप बहु निवेदितं तैः ।

शास्त्रीभवनात् आकाशवाणीभवनं गत्वा संगीतनिर्देशिका सौ. भाटाटकर सुमतिदेवी साक्षात्कृता । संस्कृतगेयगीतेषु बद्धादरायै तस्यै कानिचन गीतानि श्रावितानि । नभोवाणी-संस्कृत विषये 'महासंचालक-' (डायरेक्टर-जनरल)-विचारार्थं सुविस्तरं पत्रं दत्वा समाप्तिं नीतम् आकाशवाणी-विषयकं कार्यम् । अधिकम् अग्रे । बाबा

गृहाश्रमाचारसुसंहितेयम्

शारीरिकं मानसिकं च वीर्यं क्षमा च धैर्यं च पराक्रमश्च ।
धर्मं च कालं च विमृश्य नित्यं दानं निधानं निजसंपदश्च ॥१॥
संतानशिक्षा सुविचारदीक्षा ज्ञानाय भिक्षा निजधर्मरक्षा ।
अभ्यागतस्वागतसाधनं च गृहाश्रमाचारसुसंहितेयम् ॥२॥

डॉक्टर गोगटे चाळ, — शंकर दामोदर पेशवे
मुरारजीपेठ, सोलापूर

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

शारदा– (पुण्यपत्तनम् २.) ९ : १० * रजि. क्र. एम्. एच्. ५५७
० लायसेन्स क्र. १३७ टु पोस्ट विदौट प्रीपेमेण्ट.

शृङ्गेरी-श्री-शंकराचार्य-संचारः

मार्च १९६८		१७	हसन
१- ९	बेङ्गलूरु		श्रीशारदाशंकरप्रतिष्ठा
१०	मड्डूर	१८-१९	चिकमगलूर
११-१४	मैसूर	२०	जयपुरा
१५	कृष्णराजसागर	२१	हुलुगरकिग्गा
१६	हसन	२२	शृङ्गेरी

कोयनाभूकम्पध्वस्त-विद्याधन-साहाय्यक-समितिः

रू. २५-०० डॉ. सुमति रा. गोडे (१० मार्च ६८ दिने)
स्वर्गीय 'रा. भा. गोडे' इत्येषां वर्षश्राद्धस्य निमित्तेन
रू. ५-०० वेदमूर्ति भालचन्द्रभट्ट करम्बेळकर.
रू. ७१४-२० पूर्वं प्राप्ताः ।
रू. ७४४-२५ मार्च १०-१९६८ पर्यन्तम् । साहाय्य-प्रेषा-स्थलम्—

'शारदा'-४२५ सदाशिव पेठ, पुण्यपत्तनम् २

शारदा-वार्षिक-मूल्यं ८ रूप्यकाः

अर्थमन्त्रिभिः नूतने अर्थसंकल्पे पत्र-प्रेषा-मूल्ये वृद्धिं कृत्वा 'मूले कुठारः' इव आचरितं पत्रसृष्टिविषये । 'शारदा' कारैः गतवर्षनवकं १५,००० रूप्यकात्मकम् ऋणभारं शिरसि धृत्वा संचालिता 'शारदा' सधैर्यम् । इत उत्तरं सर्वासु दिक्षु महर्घतां साक्षात्कृत्य संप्रति अगतिकत्वात् 'शारदा'-वार्षिकं मूल्यं ५ रूप्यकेभ्यः ८ रूप्यकान्तं वर्धयितुं भृशं दुःखितं नः मानसम् । इयं मूल्यवृद्धिः १ एप्रिल ६८ दिनात् प्रारभ्यते । तत्पूर्वं मूल्यप्रेषकेभ्यः तु **वार्षिकं ५ रूप्यका एव** । त्वर्यतां मूल्यप्रेषणाय ।

संपादकः—'शारदा'

संपादकः मुद्रकः प्रकाशकः स्वामी – वसन्त अनन्त गाडगील
मुद्रणस्थलम्– यशवन्त मुद्रणालयः, १८३५ सदाशिव, पुण्यपत्तनम् २.
प्रकाशनस्थलम्-१.- म.म.प्रा.द.वा.पोतदार, ४९८ शनिवार, पुण्यपत्तनम् २.
२.—श्री. ल.म. चक्रदेव, ३१८ राममोहनमार्गः मुम्बापुरी ४.
कार्यालयः— [illegible]

CC-0. Sri Radha Krishna Samsthan, Delhi Digitized by eGangotri